।। अथ एकोनषष्ठितमोऽध्याय: ।। Chapter-59

वशिष्ठ उवाच :-

ततोगच्छे न्नृप श्रेष्ठ तीर्थं पाप प्रणाशनम् ।।
यत्र सासिद्धिचामुण्डा लोकानां सिद्धिदायिनीम् ।। १

पुरा महर्षय: सप्तसहस्त्राणि हिमाचलात् ।।
श्रीमाल क्षेत्र माजग्मु: तीर्थानि कि दर्शनेच्छया ।। २

विगाह्य सर्व तीर्थानि स्नात्वा पीत्वा चसर्वत: ।।
परस्पर मुदायुक्तान नृतु:न्ति तपस्विन: ।। ३

गायन्तो नृप सामानि कर वित्त पशोभना: ।।
सिद्धा वयं न सन्देहो ब्रुवाणा इति चानेकश: ।। ४

प्रत्यक्षा मुदयादेवी चामुण्डा लोक विश्रुता ।।
कण्ठे मुण्ड स्त्रजं कृत्वा नृत्यती सुमनोहरम् ।। ५

सिद्धास्मि इति ब्रुवाणा सा स्फुरित भिन्नोष्टसंपुटा ।।
ततस्तांमुनैया दृष्ट्वा चामुण्डा इदमब्रुवन् ।। ६

ऋषय ऊचु:

कथं सिद्धासि कथय क्षेत्रेस्मिन् सिद्धि मात्मन: ।।
इदं त्वनाहतं शास्त्रं श्रणुमो ब्रह्म दर्शनात् ।। ७

----

देव्युवाच :- मम माला कपालेभ्यो ध्वनि श्चाहत्वनाहत: ।।
श्रूयते तपसा सिद्धि-तेना श्चित्तु मम निश्चितम् ।। ८

वसिष्ठ उवाच :- इत्युक्ता: ते महात्मान: कपाले ष्वदधु: श्रुतिम् ।।
शुश्रु वुश्चध्वनिं तत्र कपाला नाम अनाहतम ।। ९

अथ: ते विस्मिता: सर्वे प्रणेमुश्चसमन्तत: ।।
न सामान्या सीति मुदाब्रुवा णास्तुति तत्परा: ।। १०

प्रत्यक्षा ततो राजन्-चामुण्डा कृपयान्विता ।।
उवाचतां जगन्माला वृणुतेति मुहुर्मुहु: ।। ११

कृणया ऊचु: यदि तुष्टासि देवेशि कृपयास्माकमञ्जसे ।।
तत्प्रयच्छ परां सिद्धिं यथा स्यादपुनर्भव: ।। १२

देव्युवाच :- दर्शना दपि मे यूयं सिद्धा प्राप्स्य थ निश्चितम् ।।
पुन र्भवोनवो भावी पुन र्ब्रूत किमिच्छथ ।। १३

कृणाय ऊचु: स्थितिर स्तुलवाञ्चैव यावत्कल्पान्तम म्बिके ।
नाम्ना वै सिद्धि चामुन्डा सिद्धि दाभव देहिनाम् ।। १४

-०-

१ वी न सामान्य त्वमसीति ब्रुवाणा: स्तुतितत्परा:

देव्युवाच :- [1]इह स्थितिं करिष्यामि भक्तेभ्यः सिद्धिदा सती ॥
भोगान् दास्यामि मुनयः प्रपन्नानां मनोगतान् ॥ १५

वसिष्ठ उवाच :- इत्युक्त्वा सा तदा देवी तत्रैवान्तरधीयत ॥
प्रतिष्ठाप्य च तैं मूर्तिं मुनयः सिद्धिमाप्नुयुः ॥ १६

इत्यासी त्सिद्धिचामुण्डा श्रीमाले मनुजेश्वर ॥
यस्याः संदर्शनादेव सिद्धिमाप्नोति मानवः ॥ १७

इदं यः शृणुयाद्भक्त्या श्रावयेद्वा नरोत्तम : ॥
प्रारब्धानां हि कार्याणां सिद्धिस्तस्य भवेदिह ॥ १८

इति श्री स्कन्द पुराणे एकाशीतिसाहस्र्यां संहितायां ब्राह्मविभागे उत्तरखण्डे श्रीमालमाहात्म्ये सिद्धि चामुण्डामाहात्म्यं नामैकोनषष्ठितमोऽध्यायः ॥ ५९ ॥

१ बी- इत्थं